"यत्र ह्रीः श्रीः स्थिता तत्र यत्र श्रीस्तत्र सन्नतिः ।
सन्नतिर्ह्रीस्तथा श्रीश्च नित्यं कृष्णे महात्मनि ॥"
इति तिथ्यादितत्त्वम् ॥
(तथा च रामायणे । ५ । ६४ । २० ।
"तव चेदं सुसदृशं वाक्यं नान्यस्य कस्यचित् ।
सन्नतिर्हि तवाख्याति भविष्यच्छुभयोग्यताम् ॥")

सन्नद्धः, त्रि, (सं + नह + क्तः) वर्म्मितः । कृतसन्नाहः । (यथा, भागवते । ७ । १० । ६६ ।
सन्नद्धो रथमास्थाय शरं धनुरुपाददे ॥")
व्यूढः । व्यूहविन्यासयुक्तः । इति मेदिनी ॥ आततायी । वधोद्यतः । इत्यमरटीकायां रायमुकुटः ॥ मन्त्रादिसंयुतः । इति शब्दरत्नावली ॥ (आबद्धः । यथा, अभिज्ञानशकुन्तले १ अङ्के ।
"कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥"
सञ्जातः । इति मल्लिनाथः ॥ यथा, रघुः । ३ । ७ ।
"पुराणपत्रापगमादनन्तरं
लतेव सन्नद्धमनोज्ञपल्लवा ॥")

सन्नयः, पुं, (सं + नी + अच् ।) समूहः । यथा, महाभारते । १ । १९० । ६ ।
"अस्मिन् राजसमावाये देवानामिव सन्नये ।
किमयं सदृशं कञ्चित् नृपतिं नैव दृष्टवान् ॥"
पश्चात्स्थायिबलः । इत्यमरमेदिनीकरौ ॥

सन्नाहः, पुं, (सन्नह्यतेऽसौ इति । सं + नह + घञ् ।) अङ्गत्राणम् । साँजोया इति भाषा । तत्पर्य्यायः । वर्म्म २ कङ्कटः ३ जगरः ४ कवचम् ५ दंशः ६ तनुत्रम् ७ माथो ८ उरच्छदः ९ । इति हेमचन्द्रः ॥ (यथा, महाभारते । ४ । ३० । १७ ।
"पृथक् काञ्चनसन्नाहान् रथेष्वश्वानयोजयन् ॥"
उद्योगः । इति रामानुजः ॥ यथा, रामायणे । ६ । ७५ । ४० ।
"ततो रामशरान् दृष्ट्वा विमानेषु गृहेषु च ।
सन्नाहो राक्षसेन्द्राणां तुमुलः समपद्यत ॥")

सन्नाह्यः, पुं, (सन्नह्यते इति । सं + नह + ण्यत् ।) युद्धयोग्यगजः । यथा,—
"राजवाह्यस्तूपवाह्यः सन्नाह्यः समरोचितः ।"
इति हेमचन्द्रः ॥

सन्निकर्षः, पुं, (सं + नि + कृष + घञ् ।) सान्निध्यम् । तत्पर्य्यायः । पार्श्वम् २ समीपम् ३ सविधम् ४ समीपाभ्यासम् ५ सवेशः ६ अन्तिकः ७ संदेशम् ८ अभ्यग्रम् ९ सनीडम् १० सन्निधानम् ११ उपान्तम् १२ निकटम् १३ उपकण्ठम् १४ सन्निकृष्टम् १५ समर्य्यादम् १६ आभ्यर्णम् १७ आसन्नः १८ सन्निधिः १९ ॥ इति हेमचन्द्रः । (यथा, कुमारे । ३ । ७४ ।
"स्त्रीसन्निकर्षं परिहर्त्तुमिच्छन्
अन्तर्दधे भूतपतिः सभूतः ॥")
न्यायमते विषयेन्द्रियसम्बन्धः । स च ज्ञानस्य कारणम् । स तु द्विविधः । लौकिकसन्निकर्षः अलौकिकसन्निकर्षश्च । लौकिकसन्निकर्षः षड्विधः । इन्द्रियसंयोगः १ इन्द्रियसंयुक्तसमवायः २ इन्द्रियसंयुक्तसमवेतसमवायः ३ श्रोत्रादिसमवायः ४ श्रोत्रादिसमवेतसमवायः ५ तदादिविशेषणता ६ ॥ अलौकिकसन्निकर्षस्तु त्रिविधः । सामान्यलक्षणा १ ज्ञानलक्षणा २ योगजः ३ । यथा,—
"महत्त्वं षड्विधे हेतुरिन्द्रियं करणं मतम् ।
विषयेन्द्रियसम्बन्धो व्यापारः सोऽपि षड्विधः ।
द्रव्यग्रहस्तु संयोगात् संयुक्तसमवायतः ।
द्रव्येषु समवेतानां तथा तत्समवायतः ॥
तत्रापि समवेतानां शब्दस्य समवायतः ।
तद्वृत्तीनां समवेतसमवायेन तद्ग्रहः ॥
विशेषणतया तद्वदभावानां ग्रहो भवेत् ।
यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते ॥
प्रत्यक्षं समवायस्य विशेषणतया भवेत् ।
अलौकिकः सन्निकर्षस्त्रिविधः परिकीर्त्तितः ॥
सामान्यलक्षणा ज्ञानलक्षणा योगजस्तथा ।
आसत्तिराश्रयाणान्तु सामान्यज्ञानमिष्यते ॥
तदिन्द्रियजतद्धर्म्मबोधसामग्र्यपेक्ष्यते ।
विषयी यस्य तस्यैव व्यापारो ज्ञानलक्षणः ॥
योगजो द्विविधः प्रोक्तो युक्तयुञ्जानभेदतः ।
युक्तस्य सर्व्वदा भानं चिन्तासहकृतोऽपरः ॥"
इति भाषापरिच्छेदः ॥

सन्निकर्षणं, क्ली, (सं + नि + कृष + ल्युट् ।) सन्निधानम् । तत्पर्य्यायः । सन्निधिः २ । इति सङ्कीर्णवर्गे अमरः ॥ सन्निधम् ३ । इति भरतः ॥ (सम्बन्धः । यथा, भागवते । ११ । २८ । १२ ।
"यावद्देहेन्द्रियप्राणैरात्मनः सन्निकर्षणम् ।
संसारः फलवांस्तावदपार्थोऽप्यविवेकिनः ॥")

सन्निकृष्टः, त्रि, (सं + नि + कृष + क्तः ।) सन्निकर्षविशिष्टः । निकटः । इति विशेष्यनिघ्नवर्गे अमरः ॥ अस्य पर्य्यायः समीपशब्दे द्रष्टव्यः ॥

सन्निधं, क्ली, (सं + नि + धा + कः ।) सन्निधानम् । इति भरतधृतवोपालितः ॥

सन्निधानं, क्ली, (सं + नि + धा + ल्युट् ।) निकटम् । इति हेमचन्द्रः ॥ (यथा, रामायणे । २ । २१ । ५३ ।
"श्रेयो मुहूर्त्तं तव सन्निधानं
ममैव कृत्स्नादपि जीवलोकात् ॥" *॥
सम्यङ्निधीयतेऽस्मिन्निति ।) आश्रयः । यथा,
"आरम्भः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां सन्निधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
दुर्ग्राह्यं यन्महद्भिः सुरनरवृषभैः सर्व्वमायाकरण्डं
स्त्रीरूपं केन लोके विषममृतमयं धर्म्मनाशाय सृष्टम् ॥"
इति शान्तिशतकम् ॥
(अवस्थानम् । यथा, मार्कण्डेये । ८७ । ३५ ।
"यस्मिन् गेहे च लिखितमेतत् तिष्ठति नित्यदा
सन्निधानं कृते ग्राहे तत्रास्माकं भविष्यति ॥")

सन्निधिः, स्त्री, (सं + नि + धा + किः ।) सन्निकर्षः । इत्यमरः ॥ (यथा, मनुः । २ । १८४ ।
"हीनान्नवस्त्रवेशः स्यात् सर्व्वदा गुरुसन्निधौ ॥"
इन्द्रियगोचरः । इति मेदिनी ॥ (अवस्थानम् । यथा, जलशुद्धिप्रकरणे ।
"गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्म्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु ॥"

सन्निपतितः, त्रि, एकत्रीकृतः । मिलितः । संनिपूर्व्वकपतधातोः क्तप्रत्ययेन निष्पन्नः ॥

सन्निपातः, पुं, (सम्यक् निपातो पतनं यत्र ।) तालभेदः । यथा,—
"एक एव गुरुर्यत्र सन्निपातः स उच्यते ।"
इति सङ्गीतदामोदरः ॥
(सम्यक् निपातो यस्मात् ।) विकारोत्पादकमिलितदोषत्रयम् । अस्य त्रयोदश नामलक्षणानि यथा,—
"शीघ्रगस्तान्त्रिकश्चैवमसाध्यश्चित्तविभ्रमः ।
कष्टसाध्यः कण्ठकुब्जः कर्णिको जिह्मकस्तथा ॥
कष्टात् कष्टतमो ज्ञेयो रुग्दाहो हन्ति मानवम् ।
अन्तको भग्ननेत्रश्च रक्तष्ठीवी निपातकः ॥
शीताङ्गश्च प्रलापश्च अभिन्यासोऽतिमारकः ।
ज्ञातव्याः सर्व्वदा वैद्यैः सन्निपातास्त्रयोदश ॥"
माधवीये ।
"शीघ्रगस्तान्त्रिकश्चित्तविभ्रमः कण्ठकुब्जकः ।
कर्णिको जिह्मकश्चैव जग्राह्वश्चान्तकस्तथा ॥
भग्ननेत्रो विलापश्च प्रलापः शीतलाङ्गकः ।
अभिन्यासश्चेति विद्यात् सन्निपातांस्त्रयोदश ॥ *
सदाह्यं श्लेष्मणा पूर्णं शूलं कासोऽतिवेदना ।
शीघ्रश्च लक्षणान्येवं शीघ्रगे सान्निपातिके ॥ १ ॥
अतितन्द्रा ज्वरः श्वासकासस्तापोऽतिसारकः ।
स्थूलकण्ठः सिता श्यामा जिह्वा कण्ठे च कूजति ॥
श्रुतिरल्पा चेति विद्यात् तान्त्रिके सान्निपातिके ॥ २ ॥
मदो मोहो भ्रमस्तापो हास्यगीतप्रलापनम् ।
नित्यं वैकल्पिता पीडा विकटाक्षनिरीक्षणम् ।
लक्षणैः सन्निपातोऽयं ज्ञातव्यश्चित्तविभ्रमः ॥ ३
कण्ठग्रहो ज्वरो मूर्च्छा दाहः कम्पविलापनम् ।
मोहस्तापः शिरोऽर्त्तिश्च वातार्त्तः प्रलयं गतः ॥
कण्ठकुब्जं सन्निपातं कष्टसाध्यं विनिर्द्दिशेत् ॥ ४
ज्वरः कर्णान्तशोथश्च श्वासः कम्पः प्रलापनः ॥
स्वेदः कण्ठग्रहस्तापस्तृष्णा मोहो भयमेव च ।
कर्णिके सन्निपाते च लक्षणानि भवन्ति हि ॥ ५ ॥
सङ्कटा कठिना जिह्वा कासः श्वासोऽतिविह्वलः ।
मूको वधिरता तापो बलहानिश्च लक्षणम् ॥
जिह्मगः सन्निपातोऽयं कष्टात् कष्टतरः परः ॥ ६ ॥
मोहस्तापः प्रलापश्च व्यथा कण्ठे भ्रमः श्रमः ॥
वेदना च तृषा जाड्यं श्वासश्च लक्षणैरिमैः ।
कष्टात् कष्टतरो ज्ञेयः कष्टाह्वः सान्निपातिकः ॥
दाहो मोहः शिरःकम्पो हिक्का श्वासाङ्गमर्द्दनम् ।
सन्तापश्चान्तको ज्ञेयः सन्निपातोऽतिमारकः ॥ ८